# Shri Shiva Stotram

# શ્રીશિવસ્તોત્રમ્

## Document Information

Text title : Shri Shiva Stotram

File name : shivastotramshrIdharasvAmI.itx

Category : shiva, gurudev, shrIdharasvAmI, stotra, panchaka

Location : doc_shiva

Author : Shridharasvami

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીશિવસ્તોત્રમ્

નિત્યાનન્દશ્ચિદાત્મા ગુણરહિતપરાકાશરૂપો વિશુદ્ધઃ
સર્વત્રાદ્વૈતરૂપો નિજનિરતિશયાત્પૂર્ણરૂપઃ પ્રશાન્તઃ ।
માયા તત્કાર્યહીનો નિરવધિરભિતો નિસ્તરઙ્ગો મહાબ્ધિઃ
સત્યં સત્યસ્ય યદ્વૈ શ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૧॥

વિશ્વં નેતિ પ્રમાણાદ્વિગલિત જગદાકારભાનાત્સ્વપૂર્ણઃ
સમ્યક્સચ્ચિદ્ઘનૈકામૃતસુખકવલાસ્વાદપૂર્ણો વિવેકી ।
નિર્દ્વન્દ્વો નિત્યમુક્તો વિગલિતમમતાહઙ્કૃતિર્નિત્યતૃપ્તઃ
આસ્તે યદ્બ્રહ્મમાત્રં શ્રુતિષુ નિગદિત કેવલં તચ્છિવોઽહમ્ ॥ ૨॥

આદૌ મધ્યે તથાન્તે જનિમૃતિફલદં કર્મમૂલં વિશાલં
છિત્વા સંસારવૃક્ષં નિજનિરતિષયાસઙ્ગશસ્ત્રેણ પૂર્ણમ્ ।
ભાસા યસ્યૈવ સર્વં ભસિતમતિરુચા ભાસકં ભાસકાનાં
જીવો બ્રહ્મૈવ યત્સ્યાચ્છ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૩॥

જ્ઞાત્વા નિઃસારમેવં જગદખિલમિદં ભ્રાન્તિમોહપ્રદં યત્
ત્યક્ત્વા ભોગૈકવાઞ્છાં વિરતિયુત ઇતો મન્યતે યદ્વિસૌખ્યમ્ ।
આમૃત્યોર્બ્રહ્મલોકં શતશતગુણિતં તારતમ્યેન ભાતં
યસ્મિન્નલ્પં યદેવં શ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૪॥

મૃત્યોરાપ્નોતિ મૃત્યું સ ઇહ જગદિદં યસ્તુ નાનેવ પશ્યેત્
ઉક્ત્વા યત્પૂર્ણરૂપં શ્રુતિ શિરસિમતં નેહ નાનાસ્તિ વાચા ।
આપ્તોક્ત્યા ભાતિ યદ્વદ્વ્યપગતફણિની રજ્જુરેકા ભ્રમાન્તે
તદ્વદ્બ્રહ્મૈવ યત્સ્યચ્છ્રુતિષુ નિગદિતં કેવલં તચ્છિવોઽહમ્ ॥ ૫॥

ઇતિ શ્રીમત્ પરમહંસ પરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવતા
શ્રીધરસ્વામિના વિરચિતં શ્રીશિવસ્તોત્રં સમ્પૂર્ણમ્ ।
(રચનાકાલ - આષાઢ શુક્લ ૧૩, શકે ૧૮૬૭)

Proofread by Paresh Panditrao

*Shri Shiva Stotram*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*